गणाधीशमीशं गुणानां प्रणम्य, तथा निर्गुणोद्भूत-सर्गस्य मूलम्।
अथो शारदां तां चतुर्वाक्-स्वरूपाम्, अनंतं हि विद्याम तं राम-मार्गम्।।१।।
मनः सन्मते भक्तिमार्गो हि सेव्यः, तदा श्रीहरिः प्राप्यते लीलयैव।
जनैर्निंदितं सर्वमेवात्र वर्ज्यं, जनैः श्लाघितं सर्वभावेन कार्यम्।।२।।
प्रभाते हृदि श्रीहरिश्चिंतनीयः, ततो वैखरी तज्जपे योजनीया।
सदाचारमेतं हितं न त्यजेद्यः, स एवास्ति लोके मनुष्येषु धन्यः।।३।।
मनो मास्तु दुर्वासना ते कदाऽपि, मनः सर्वथा पापबुद्धिश्च माऽस्तु।
मनो मा त्यज श्रेयसीं धर्मरीतिं, मनस्तेंऽतरे सारधीः सर्वदाऽस्तु।।४।।
मनः पापसंचिंतनं त्याज्यमेव, मनः सत्यसंकल्प एवानुसेव्यः।
मनः कल्पनां मुञ्च शब्दादिकानां विकारैर्मनुष्येऽत्र धिक्कारमेति।।५।।
मनः खेदकृत् क्रोधलेशोऽपि माऽस्तु, मनो माऽस्तु कामो विकारैकहेतुः।
मनस्त्वं मदं चापि माऽङ्गीकुरुष्व, मनो माऽस्तु ते मत्सरो मा च दंभः।।६।।
मनः सात्त्विकी सा धृतिश्चावलंब्या, मनो दुर्वचोऽन्यस्य च क्षम्यमेव।
मनः सर्वदा सौम्यवाग् योजनीया, मनः सर्वलोकाश्च संप्रीणनीयाः।।७।।
यथा देहपातेऽपि कीर्तिः स्थिरा स्यात्, तथा हे मनः सर्वथा वर्तितव्यम्।
परार्थे स्वदेहं नियुज्य त्वयाऽत्र, यथा चंदनं सज्जनास्तोषणीयाः।।८।।
मनो मा गृधस्त्वं धनं कस्यचिद् रे, अतिस्वार्थबुद्ध्या भवेत् पापपुंजः।
भवेद्येन पापं न तत् साधु कर्म, यदा नेष्टसिद्धिस्तदा भूरि दुःखम्।।९।।
सदा प्रीतिरस्तु प्रभौ रामचंद्रे, स्वयं मानसाद्दुःखजालं निवार्यम्।
मनो देहदुःखं सुखत्वेन भोग्यं विवेकात्सदा स्थेयमात्मस्वरूपे।।१०।।
जगत्यां हि को नाम संपूर्णसौख्यः, विचार्यात्र सम्यङ् मनो निश्चिनु त्वम्।
यथाऽऽसीत्त्वया संचितं कर्म पूर्वं, तथा हे मनस्तत् त्वयैवेह भोग्यम्।।११।।
मनो मानसे माऽस्तु ते दुःखलेशः, मनः सर्वथा नाऽस्तु शोको न चिंता।
विवेकात् प्रहेयः शरीरात्मभावः, विदेहस्थितिर्मुक्तिरासेवनीया।।१२।।
मनो ब्रूहि किं रावणस्येह जातं, न किं तस्य राज्यं ह्यकस्मात् प्रणष्टम्।
अतो वासनां त्वं प्रहीणां त्यजाशु, बलिष्ठो हि कालः सदा पृष्ठलग्नः।।१३।।
जनुर्लभ्यते कर्मणा जीवलोके, तथा चांतकाले म्रियंतेऽत्र सर्वे।
महांतो हि मृत्योः पथैव प्रयाताः, असंख्या जना अत्र जाता मृताश्च।।१४।।
मनः खल्वियं विद्यते मृत्युभूमिः, तथाऽप्यत्र सर्वेऽप्यहंकारलिप्ताः।
चिरं जीवितं मन्यते चात्र सर्वैः, अकस्मात् परित्यज्य सर्वे प्रयांति।।१५।।
मृतं कंचिदालोक्य यः शोकविग्नः, अकस्माद् हि मृत्योर्वशं सोऽपि याति।
अनंतो हि लोभो मनः क्षोभमूलं स तस्मात् पुनर्जायते जीवलोके।।१६।।
नरो मानसे हन्त चिंतां करोति, अकस्मात्तु भव्यं भवत्येव लोके।
अहो, कर्ममूला हि सर्वेऽपि भोगा, वृथा मंदधीः खिद्यते विप्रयोगात्।।१७।।
मनो राघवादन्यवांछा न कार्या, मनो मानवं मा वृथा कीर्तय त्वम्।
पुराणानि वेदाश्च यं वर्णयंते, नरश्श्लाघ्यतां याति तद्वर्णनेन।।१८।।
ऋतं हे मने मा त्यज त्वं कदापि, मनः सर्वथा मा श्रय त्वं च मिथ्या।
मनः सत्यमेवोच्यतां सत्यवाचा, मनो यत्तु मिथ्या सदा तद्विवर्ज्यम्।।१९।।
भृशं कष्टदो मातृगर्भे निवासः, मनो मास्तु सा यातना या ह्यसह्या।
निरोधात्तु गर्भावृतः पच्यमानः, स बालः स्थितोऽधोमुखो दुःखितोऽस्ति।।२०
मनोवासनोत्थं पुनर्जन्म हेयं, मनो द्रव्यदाराऽऽदिकामोऽपि वर्ज्यः।
मनो यातना पुष्कला गर्भवासे, मनो दर्शनं श्रीहरेः कारयस्व।।२१।।
मनः सज्जन त्वं हितं मे कुरुष्व, रघूणां वरं त्वं निधेहि स्वचित्ते।
जनानामधीशः प्रभुर्वायुसूनोः, जनोद्धारकः सोऽस्ति नाथस्त्रिलोक्याः।।२२।।
न वाच्यं रामनामादृतेऽन्यज्, जने वाग्व्ययान्नैव लाभः सुखस्य।
क्षणाऽनुक्षणं काल आयुर्हरेत्सः, शरीरांतकालेऽथ को मोचयेत्त्वाम्।।२३।।
ऋते रामनामाद्वृथा श्राम्यसि त्वं, पृथग्लोकवत्किं वृथाऽत्र प्रलापैः।
सदा सर्वदा नाम वाचा जप त्वम्, अहंतांऽतरे पापिनी सा च माऽस्तु।।२४।।
मनो मा जुगुप्साऽस्तु भावोपदेशे, कथं तेऽन्यथा संभवेद्रामलाभः।
सुखस्येह कालोऽस्त्यवच्छेदकारी, ततस्तद्व्यपैति स्थिरं नैव किंचित्।।२५।।
कृतश्चेत् स्वदेहस्य रक्षाप्रयत्नः, तथाप्यंततो मृत्युना नीयते सः।
अतो हे मनो राघवं त्वं भजस्व, ततः स्वांतराद्मुंच चिंतां भवस्य।।२६।।
भवाद्भीतभीतं किमत्रासि भीरो, धर त्वं मनो धैर्यमावर्ज्य भीतिम्।
रघूणां पतिः सर्वदा रक्षकस्ते, स नोपेक्षते दंडपाणौ हि क्रुद्धे।।२७।।
अमुं दीननाथं च कोदंडपाणिं पुरो वीक्ष्य रामं स कालो बिभेति।
मनो वाक्यमेतद्यथार्थं मनुष्व, न कुर्यादुपेक्षां स दासाभिमानी।।२८।।
पदे तद्व्रतं घोष्यते नूपुराभ्यां, तदीयं धनुर्भक्तशत्रून्निहंति।
पुरी वाहिता येन सर्वा विमाने, न कुर्यादुपेक्षां स दासाभिमानी।।२९।।
समर्थस्य दासं स्वयं वक्रदृष्ट्या, क्षमो वीक्षितुं को नु भूमंडलेऽस्मिन्।
यदीयं यशो वर्ण्यते च त्रिलोक्या, न कुर्यादुपेक्षां स दासाभिमानी।।३०।।
महासंकटान्मोचिता येन देवाः, प्रतापे बले यो गुणेऽप्यद्वितीयः।
स्मरत्यद्रिजा शूलपाणिस्तथा यं, न कुर्यादुपेक्षां स दासाभिमानी।।३१।।
अहल्याशिला मोचिता राघवेण, पदस्पर्शनात्सा हि दिव्यत्वमाप।
अहो वर्णने यस्य वेदोऽपि खिन्नः न कुर्यादुपेक्षां स दासाभिमानी।।३२।।

वसंत्यत्र मंदारमेरू तथैव, शशीसूर्यताराघनाः खे च यावत्।
चिरंजीवितां प्रापितौ येने दासौ, न कुर्यादुपेक्षां स दासाभिमानी।।३३।।
उपेक्षां न कुर्यात्कदापीह रामः, जनाः पामराः किं तु नो विश्वसंति।
पुराणं वचो भक्तभारं वहामीत्युपेक्षां न कुर्यात्स दासाभिमानी।।३४।।
अहो स्वांतरे यस्य भावो यथाऽऽस्ते, वसत्येव देवस्तथा तस्य चित्ते।
शरण्याँसदा पाति यश्चापपाणिर्न कुर्यादुपेक्षां स दासाभिमानी।।३५।।
सदा प्राणिनां संनिधौ देव आस्ते, कृपालुस्तु तेषां धृतिं वीक्षते सः।
सुखानंदकैवल्यदाने समर्थः, न कुर्यादुपेक्षां स दासाभिमानी।।३६।।
सदा चक्रवाकौ यथा पाति सूर्यः, तथा संकटे स प्रभुः पाति शीघ्रम्।
हरिर्भक्तपः श्रूयते दुंदुभिश्च, न कुर्यादुपेक्षां स दासाभिमानी।।३७।।
मनः प्रार्थनां संशृणु त्वं मदीयां, तथोपास्व रामं यथा विस्मितः स्यात्।
अवज्ञा न कार्या मम प्रार्थनाया मनः सन्मते राघवे तेस्तु निष्ठा।।३८।।
पुराणानि वेदाश्च यं वर्णयंते, भवेद्यस्य संगात्समाधानलाभः।
इदं चंचलत्वं हि तस्मै समर्प्य, मनः सन्मते राघवे तेस्तु निष्ठा।।३९।।
मनो लभ्यते रे सुखं यत्र सर्वमतीवादरेणैव तल्लक्षणीयम्।
विवेकेन दुष्कल्पनां संत्यज त्वं, मनः सन्मते राघवे तेस्तु निष्ठा।।४०।।
उपायैर्विभिन्नैर्न सौख्यस्य लाभः, श्रमः केवलं नो हितं तैस्तु किंचित्।
विवेकात्समुद्बोधयाऽऽत्मानमेव, मनः सन्मते राघवे तेस्तु निष्ठा।।४१।।
अलं विस्तरेण त्वयैतद्धि कार्यं, मनो रामनाथः स्वकीयो विधेयः।
व्रतं नूपुरोद्घोषितं दीनरक्षा, मनः सन्मते राघवे तेस्तु निष्ठा।।४२।।
मनः पथ्यमेकं वचः स्वीकुरु त्वं, त्वया सर्वथा स्वं हितं साधनीयम्।
ऋते रामनामाद्वचोऽन्यन्नवाच्यं, सदा मानसे निदिध्यासितव्यम्।।४३।।
मनो मौनमुद्रा त्वयाऽऽसेवनीया, कथा राघवस्याऽथवा कीर्तनीया।
सदा रामहीनं त्वया धाम वर्ज्यं, सुखार्थे त्वयाऽरण्यमासेवितव्यम्।।४४।।
भवेद्यस्य संगात्समाधानभंगः अहंन्तोद्भवस्स्यादकस्माच्च चित्ते
भवेत्तादृशे ते कुसंगे सुखं किं यदाश्रित्य जह्यान्मती रामचंद्रम्।।४५।।
मनो या घटी रामहीनाऽपयाता त्वया नाशितं जीवनं स्वं नु तावत्।
विना रामनामाच्छ्रमोऽन्यद्धि सर्वं हिते योऽस्ति दक्षः स रामेऽनुरक्तः।।४६।।
हृदंतर्बहिश्चाऽपि रामं प्रपश्यन्नरो ज्ञानावान्भक्तिमाँश्चाऽपि यः स्यात्।
गुणोपासनां साधनां चाचरेद्यः स धन्योऽत्र दासो हि सर्वोत्तमस्य।।४७।।
सदादेवकार्ये क्षरेद्यस्य देहः सदा रामनामैव वाचा जपेद्यः।
स्वधर्मं सदा यश्चरत्येव सम्यक्स धन्योऽत्र दासो हि सर्वोत्तमस्य।।४८।।

सदा वक्ति यत्तद्वदेवाचरेद्यः अनेकेषु यः पश्यति ब्रह्म चैकम्।
गुणोपासकः सन्नपि भ्रांतिमुक्तः स धन्योऽत्र दासो हि सर्वोत्तमस्य।।४९।।
न यस्यांतरे कामजास्ते विकारा उदास्ते च यस्तापसो ब्रह्मचारी।
सदा शांतवृत्तिस्तमोलेशहीनः स धन्योऽत्र दासो हि सर्वोत्तमस्य।।५०।।
न यस्मिन्मदो मत्सरः स्वार्थबुद्धिः प्रपंचश्च नास्ते यदर्थे ह्युपाधिः।
सदा भाषते सूनृतां यश्च वाचं स धन्योऽत्र दासो हि सर्वोत्तमस्य।।५१।।
क्रमेत्तत्त्वचिंताऽनुवादेन कालं न लिप्तस्तथा दंभवादादिभिर्यः।
जनैः संवदत्येह यः सृष्टिमूलम् स धन्योऽत्र दासो हि सर्वोत्तमस्य।।५२।।
ऋजुर्यः सदा यश्च लोकप्रियः स्यात्सदा सत्यवादी तथा यो विवेकी।
न येनोच्यते वागसत्या कदापि स धन्योऽत्र दासो हि सर्वोत्तमस्य।।५३।।
सदा सेवते यौवने यो विविक्तं न यः कल्पनाजालबद्धः कदापि।
दृढोनिश्चयश्चेतसो यस्य नित्यं स धन्योऽत्र दासो हि सर्वोत्तमस्य।।५४।।
न हि स्वार्थरूपा दुराशाऽस्ति चित्ते हरेर्भक्तितृष्णाऽऽकुलं यन्मनोऽस्ति।
कृतो येने देवोऽधमर्णः स्वभक्त्या स धन्योऽत्र दासो हि सर्वोत्तमस्य।।५५।।
दयालुर्हि दीने मृदुः स्नेहपूर्णः कृपालुश्च लोकेऽस्ति यो दासमात्रे।
न च क्रोधसंतापलेशोऽपि चित्ते स धन्योऽत्र दासो हि सर्वोत्तमस्य।।५६।।
जपन्नाम नित्यं नरोऽस्तीह धन्यः क्रिया ज्ञानभक्ती भवेयुश्च नित्यम्।
उदासीनता जीवने सारभूता तया सर्वदा स्याद्धि निस्संगवृत्तिः।।५७।।
मनो माऽस्तु ते वासना वृत्तिरूपा पदार्थेषु कामोद्भवः पूर्वपापात्।
फलाशां विनैव प्रभुश्चिंतनीयः मनः कल्पनायाश्च लेशोऽपि हेयः।।५८।।
मनः कल्पनाः कल्पयन् कोटिशोऽपि नरो नाप्नुयाद्दर्शनं राघवस्य।
मनस्यास्ति कामो न तस्यास्ति रामः यतः सादरं तस्य रामे न भक्तिः।।५९।।
हरिं कल्पवृक्षं निधिं कामधेनुं कथं तं नु चिंतामणिं वर्णयेयम्।
मनो योऽस्ति सद्येन सर्वस्य सत्ता अहो तन्निभं विद्यते किं नु लोके।।६०।।
स्थितः कल्पमूलेऽपि यो दुःखितः स्यात् सदा तस्य चित्ते वसेद्दुःखमेव।
तदा सज्जनैर्यो विवादे प्रसक्तः स पश्चाद्भवेच्छोकभाङ्नाऽत्र शंका।।६१।।
विवादाद्भवेत्तन्निदिध्यासभंगस्ततश्चोद्भवेच्छोकसंतापवृत्तिः।
सुखानंदनाशो भवेद्भेदबुद्ध्या मनो निश्चयो लुप्यते क्षुब्धवृत्त्या।।६२।।
गृहे कामधेनुः परं तक्रयाञ्चा तथैवात्मबोधेऽपि वादप्रियत्वम्।
करस्थेऽपि चिंतामणौ काचयाच्ञां करोतीह विंदेत्स तान् काचखंडान्।।६३।।
विमूढोऽस्ति यस्तस्य नो बुद्धिदार्ढ्यं तथा योऽतिकामी न रामस्तदंतः।

अतीवाऽस्ति लुब्धो न तस्यास्ति शांतिस्तथा योऽतिभोगी सदा सोऽस्ति दीनः।।६४।।
वृथा जीवनं माऽस्तु ते भक्तिशून्यं प्रमूर्खः सदा भूयसा दुःखितः स्यात्।
मनः सादरं तेऽस्तु रामेऽनुरागः परं वासना माऽस्तु वित्ते ह्यरामे।।६५।।
असारोऽस्ति संसार एषोऽतिघोरः मनः सन्मते सत्यमन्विष्य लोके।
विषे सेविते रे सुखं ते कथं स्यात् अतो हे मनो राघवं ध्याय नित्यम्।।६६।।
घनश्यामवर्णश्च लावण्ययुक्तः सुधीरो गभीरः प्रतापेन पूर्णः।
स्वदासं परित्रायते संकटाद्यः प्रभाते स हृत्स्थो हरिश्चिंतनीयः।।६७।।
बलिष्ठः स रामोऽस्ति कोदंडधारी करालः स कालोऽपि तस्माद् बिभेति।
कथा मानवस्यास्ति का पामरस्य प्रभाते ततः श्रीहरिर्ध्येय नित्यम्।।६८।।
सुखानंदकृद्वारयेद्यश्च भीतिं स भक्त्या जगत्यां जनैः पूजनीयः।
विवेकाद्दुराचारबुद्धिश्च हेया प्रभाते हृदि श्रीहरिश्चिंतनीयः।।६९।।
मनः कीर्तय त्वं हरिं कामपूरम् सदा तं भजन् बाध्यते नाऽऽपदाभिः।
मदाऽऽलस्यदोषः समुत्सर्जनीयः प्रभाते हृदि श्रीहरिश्चिंतनीयः।।७०।।
महादोषनाशो भवेद्यज्जपेन जनः सद्गतिं प्राप्यते यज्जपेन।
तथा पुण्यवृद्धिर्भवेद्यज्जपेन प्रभाते स रामोऽनुचिंत्यो जनेन।।७१।।
भवेन्न व्ययः स्वीयवित्तस्य कश्चित्तथोच्चारणं रामनाम्नो न कष्टम्।
महान्जीयते येन संसारशत्रुः प्रभाते स रामोऽनुचिंत्यः सदैव।।७२।।
तपः साधनं भूयसा दुःखकारि परं नामसंकीर्तनं नैव दुःखम्।
शिवेनापि यश्चिंत्यते देवदेवः प्रभाते स रामः सदैवानुचिंत्यः।।७३।।
मनः साधनं संकटप्रायमेव धनाधीनमेव व्रतोद्यापनादि।
स दीने दयालुर्हृदि ध्येय एव प्रभाते स रामोऽनुचिंत्यः सदैव।।७४।।
समस्तेषु खल्वास्ति नामैव सारो न तद्बुध्यसे चेत्समन्विष्य सर्वम्।
वृथा संशयः सर्वथा वर्जनीयः प्रभाते स रामः सदैवानुचिंत्यः।।७५।।
न वै कर्म धर्मश्च नो नैव योगो न वा त्यागभोगौ यथावत्क्रियंते।
अथो वक्ति दासो जपे श्रद्दधस्व प्रभाते स रामोऽनुचिंत्यः सदैव।।।७६।।
हरिं कामयञ्जायते कामशून्यः स पश्येत्स्वरूपं सदा जीवजाते।
हरेः कीर्तने श्रद्दधानश्च भक्तः गुणोद्गानमग्नो भवेद्द्वंद्वशून्यः।।७७।।
अहो यो नरो रामविश्वासशून्यो नरं पामरं बाधते तं हि सर्वम्।
स्थिते स्वामिरामे तु कैवल्यदेऽस्य वृथा देहसंसारचिंता नरस्य।।७८।।
मनः पावनीं भावनां राघवस्य निधेह्यंतरे माऽस्तु चिंता भवस्य।
भवो मानवं भ्रामयत्येव नित्यम् असद्वस्तुनो भावना व्यर्थरूपा।।७९।।
मनः श्रीवरं शंभुहृत्स्थं श्रय त्वं ततो दुस्तरं तं भवाब्धिं तरेस्त्वम्।
स्वकुक्षिंभरित्वं मनो विस्मर त्वं खरं मत्सरं सर्वथा नाशय त्वम्।।८०।।
मनो मत्सरान्नाम मा संत्यज त्वम् अतीवाऽऽदरात्तन्निदिध्यासितव्यम्।
समस्तेषु नामैव नूनं वरिष्ठं द्वितीयं न वै साधनं तेन तुल्यम्।।८१।।
न रामस्य नाम्नाऽपरं नाम तुल्यम् अभाग्यो नरः पामरो वेत्ति नेदम्।
विषघ्नं तदित्याश्रयत्पार्वतीशः कथा मानवस्यात्र का पामरस्य।।८२।।
स्मरध्वंसको ध्यायतीशं हि रामम् उमां तद्गुणाँ श्रावयत्यादरेण।
अतिज्ञानवैराग्यसामर्थ्ययुक्तोऽप्यसौ रामनाम्न्यस्ति विश्वासपूर्णः।।८३।।
धृतो विठ्ठलेनाऽस्ति यो मूर्ध्नि देवः शिवः सोऽपि यं ध्यायति त्वं न किं तम्।
यतस्तापसश्चंद्रमौलिः प्रशांतः स रामो नरं मोचयेदंतकाले।।८४।।
भजेद्योगिविश्रामधामैव रामं जपत्येव गौरीहरो यं च नित्यम्।
स्वयं चंद्रमौलिर्हि येनैव शांतः स रामो हि वो मोचयेदंतकाले।।८५।।
मुखे रामनामाद्धि विश्रामलाभः सदा तत्स्मरन्सर्वदाऽऽनंदमग्नः।
ततोऽन्यद्धि संदेहकृत्क्लेशपूर्णं निजं धाम शोकापहं रामनाम।।८६।।
मुखे यस्य रामो जयेत्तं न कामः सदा नामयोगान्न तद्धैर्यहानिः।
हरेर्भक्त एव क्षमः कामनाशे सुधन्यो जने मारुतिर्ब्रह्मचारी।।८७।।
अतीवोत्तमं स्वादु तद्रामनाम सुलभ्यं विनामूल्यमल्पाक्षरं च।
भवेद् भर्जितं तेन संसारमूलं जनानां तदेवेह कैवल्यरूपम्।।८८।।
समाजे पठेद् भोजने रामनाम तदा सादरं तत्समुद्घोषणीयम्।
हरिश्चिंतनीयः प्रतिग्रासमेव ततः श्रीहरिः प्राप्यते लीलयैव।।८९।।
सदा रामहीनस्य घोराऽस्तिहानिः स जातो वृथा नाम्नि यस्यास्ति कष्टम्।
हरेर्नाम यद्वेदशास्त्रैः प्रशस्तं पुराणेषु तन्निस्तुलं व्यासशस्तम्।।९०।।
घृणा नैव कार्या प्रभौ रामचंद्रे अतीवादरेणैव तन्नाम जप्यम्।
व्ययस्ते न कश्चिज्जपे रामनाम्नः ततो घोषयेज्जानकीशस्य नाम।।९१।।
जनैः सादरं घोषिते रामनाम्नि गिरेः कंदरं यांति सर्वेऽपि दोषाः।
हरिस्तिष्ठति प्रीणितो नामघोषाद् अतः शंकरो रामनाम्न्यस्ति सक्तः।।९२।।
जगत्यस्ति देवो हि सर्वान्नदाता वहत्येव विश्वस्य चिंता स नित्यम्।
जपे देवनाम्नो विनामूल्यरूपे मनः किं नु ते हीयते ब्रूहि तन्मे।।९३।।
क्षमो यस्य रोषो त्रिलोकीविदाहे हरः सोऽपि लेभे शमं रामनाम्ना।
जपद्यादरात्पार्वती विश्वमाता अतस्तद्धि सर्वेऽपि नित्यं जपंतु।।९४।।
अघोऽजामिलः पुत्रसंकेतयोगाद्गुणं नाम नारायणेत्याप मुक्तिम्।

शुकं कुट्टिनी रामनाम्नाऽऽह्वयंती गतिं प्राप सा सुप्रसिद्धा पुराणे।।९५।।
महान्देवभक्तः सप्रह्लाददैत्योऽजपद्रामनामावलिं सर्वकाले।
पिता तस्य पापस्तदा तन्न सेहे स दैत्यः स्वयं नावदत्तत्कदापि।।९६।।
न यद्वाचि रामः स मुक्तः कथं स्याद् अहंतावशाद्यातना स्याद् वृथैव।
ततः सोंऽतकाले परं याति दुःखम् अतो ब्रूत रे राम रामेति नित्यम्।।९७।।
पुरा प्रस्तरास्तारिता रामनाम्ना जडा मानवास्तारिता नैकशोऽत्र।
परं शंकितो यः सदा रामनाम्नि स तन्नो वदेत्पापरूपः कदाऽपि।।९८।।
जगत्यां हि वाराणसी पुण्यभूमिः जनास्तत्र याताः पितृनुद्धरंति।
जपन् रामनाम स्थितस्तत्र जीवान् समुद्बोधयन्सर्वदा चंद्रमौलिः।।९९।।
यथावज्जनानां न कर्मात्र शक्यं कृतेऽपीह धर्मेऽस्ति नो पुण्यलाभः।
दया भूतमात्रे न कस्यापि दृष्टा अमूल्यं च नामापि हा नोच्चरंति।।१००।।
न यस्य प्रियं नाम तं शास्ति कालः विकल्पात्कुतर्काद्गतिर्नारकी स्यात्।
अतोऽत्यादरेण प्रभोर्नाम जप्यं जपाद्दोषनाशो भवेल्लीलयैव।।१०१।।
परां लीनतां सर्वभावात्स्वभावादुरीकृत्य संतो हि संतोषणीयाः।
स्वदेहश्च भूतोपकारे नियोज्यो गुणेशश्च सर्वादरेणेह सेव्यः।।१०२
हरेः कीर्तने तद्गुणे प्रीतिरस्तु अहंता निरुक्तिप्रसंगे च मास्तु।
परेषां धनं चापि कांता परस्य स्वचित्तान्मनुष्येण निष्कासनीये।।१०३।।
स्वयं नाचरन्बोधयन् किंतु लोकान्नरः स्वीयदोषाद्धि लज्जामुपेयात्।
मनो यस्य वाक्केवलं स्वैररूपा कथं तेन मर्त्येन देवः स लभ्यः।।१०४।।
विवेकादशुद्धां क्रियां स्वां विहाय नरेणादराच्छुद्धरूपा हि वर्या।
यथा भाषसे तात तद्वच्चर त्वं मनः कल्पना मुंच संसारमूलाम्।।१०५।।
यथावत्कुरु श्रद्धया स्नानसंध्यां विवेकान्मनः संयतात्मा भव त्वम्।
दया सर्वभूतेषु यस्यास्ति नित्यं सदा प्रेमलः शम्यते रामभक्त्या।।१०६।।
मनो माऽस्तु कोपोद्भवस्ते कदापि मनस्तेऽस्तु बुद्धिः सदासाधुसंगे।
मनो दुर्जनैः पूर्वसंगं विहाय सुसंगाद्धि मोक्षार्हतां यास्यसि त्वम्।।१०७।।
सदा सर्वदा सज्जनैरेव संगाद्दुराचारलोपाद्भवेद्भक्तियोगः।
क्रियाशून्यवाचालता वर्जनीया यतो वादशांतिः स संवाद इष्टः।।१०८।।
वितंडां परित्यज्य लोकेषु सर्वैः सुखं तत्त्वसंवाद एवात्र कार्यः।
जगत्यामसौ शोकसंतापहारी यतो वादशांतिः स संवाद इष्टः।।१०९।।
यतो वादशांतिः स संवाद उक्तो विवेकादहंकारभावो विजेयः।
अहंतोद्भवा वादजन्या विकारा यतो वादशांतिः स संवाद इष्टः।।११०।।

हितायैव ते कथ्यते सत्यवाक्यं हितार्थे च सर्वं विमर्श स्वयं त्वम्।
हितायैव पाषंडबुद्धिं त्यज त्वं यतो वादशांतिः स संवाद इष्टः।।१११।।
गतं वादिनोर्जन्म वादानुवादे परं नैव शांतो विवादो जनानाम्।
यतः संशयो दंभरूपः स वादो यतो वादशांतिः स संवाद इष्टः।।११२।।
विवादे हितं हेलितं पंडितैर्यैरहंताबलाद्ब्रह्मरक्षांसि जाताः।
परेशादृते पंडितोऽस्तीह कोन्यः मनः संत्यज त्वं स्वकीयामहंताम्।।११३।।
परस्योपदेशे श्रमो नास्ति कश्चिन्मनः प्रत्यहं वर्धतेंऽतस्तु दर्पः।
क्रियाशून्यवाचालता सा वृथैव विचार्य स्वयं सर्वथा निश्चिनु त्वम्।।११४।।
विवादी न यः संवदेत्तेन साकं विवेकादहंता स्वतो वर्जनीया।
वदेद्यत्तवाचरेत्सर्वदैव विशुद्धक्रियो भक्तिमार्गो हि सेव्यः।।११५।।
भृशं शापितो दुःखितः सोंऽबरीषस्तदर्थे हरिर्नैकजन्मानि भेजे।
उपामन्यवे दत्तवान् क्षीरसिंधुं न कुर्यादुपेक्षां स भक्ताभिमानी।।११६।।
ध्रुवं बालकं दैन्यभाजं वराकं परं ध्यानमग्नं विलोक्यानुकंप्य।
चकार स्थिरं यो हि तारांगणे तं न कुर्यादुपेक्षां स भक्ताभिमानी।।११७।।
गजेंद्रं महासंकटे ध्यानमग्नं प्रतीक्षापरं श्रीहरिस्तं प्रधावन्।
स्वयं यः परित्रातवान्नक्रबंधान्न कुर्यादुपेक्षां स भक्ताभिमानी।।११८।।
द्विजोऽजामिलः पापकर्माऽतकाले कृपासिंधुना मृत्युपाशाद्विमुक्तः।
शरण्यो ह्यनाथस्य यश्चक्रपाणिर्न कुर्यादुपेक्षां स भक्ताभिमानी।।११९।।
विधेर्हेतुना योऽभवन्मत्स्यरूपो धरं योऽधरत्कूर्मरूपेण पृष्ठे।
जनोद्धारणार्थं श्रितो नीचयोनिं न कुर्यादुपेक्षां स भक्ताभिमानी।।१२०।।
महाभक्तप्रह्लादकष्टक्षयार्थं नृसिंहस्वरूपं च रौद्रं दधार।
समर्थो न यं भीषणं कोऽप्युपेतुं न कुर्यादुपेक्षां स भक्ताभिमानी।।१२१।।
ययाचे कृपां वज्रपाणिर्यदा तं तदा चक्रपाणिः स्वयं वामनोऽभूत्।
द्विजार्थेऽभवद्भार्गवश्चापपाणिर्न कुर्यादुपेक्षां स भक्ताभिमानी।।१२२।।
अहल्यासतीहेतुनाऽरण्यमार्गं सिषेवेऽथ देवाँश्च बंधाद्विमोक्तुम्।
बलात्प्राहरद्रावणस्य ध्वजं यो न कुर्यादुपेक्षां स भक्ताभिमानी।।१२३।।
पुरा द्रौपदीं यः प्रपन्नां सुशीघ्रं त्वरावान्विहायाऽऽसनादि प्रयातः।
कलौ योऽभवद्बुद्धदेवश्च मौनी न कुर्यादुपेक्षां स भक्ताभिमानी।।१२४।।
स्वभक्तान्सुदीनाननाथाँश्च पातुं कलौ संभविष्यत्यसौ कल्किदेवः।
अहो वर्णने यस्य वेदोऽप्यशक्तः न कुर्यादुपेक्षां स भक्ताभिमानी।।१२५।।
जनानुग्रहार्थं हि लीलावतारा अनेके धृताः सादरं येन पूर्वम्।

न तं जानते ते जनाः पापरूपा दुरात्मानदुर्दांतचांडालपापाः।।१२६।।
सुखी रामरूपेण यः सोऽत्र धन्यः तथाऽऽकर्ण्य यस्तत्कथास्तत्र लीनः।
शरीरात्मता रामबोधात्प्रलुप्ता मनोवासना रामरूपे विलीना।।१२७।।
मनो वासना तेऽस्तु रे वासुदेवे मनःकामना माऽस्तु रे कामसंगे।
मनः कल्पनां त्वं वृथा मा कुरुष्व मनः सन्मते साधुसंगे रमस्व।।१२८।।
मनः सद्गतिर्लभ्यते साधुसंगात्तथा विंदते दुर्जनः सन्मतित्वम्।
रतीशो मनःक्षोभकोऽस्तीह नूनमतः साध्यतामुन्मनी यत्नपूर्वम्।।१२९।।
मनो माऽस्तु संकल्पलेशोऽपि चित्ते सदा सत्यसंकल्प एवास्तु चित्ते।
न जल्पो जने नो विकल्पोऽपि चित्ते रमाकांतरूपं भज त्वं विविक्ते।।१३०।।
जगत्यां जनैः सेव्य एको हि रामः असौ सत्यसंधस्तथाऽमोघशस्त्रः।
चरित्रं यदीयं जनोद्धारकं च स सेव्यो विवेकात्सदा जानकीशः।।१३१।।
विचार्यैव यो भाषते वर्तते च तदीयेन संगेन संतापशांतिः।
विवेकं विना मा वद त्वं कदापि विशुद्धं तथा संयतं चाचर त्वम्।।१३२।।
नरो भक्तिमाञ्ज्ञानवान्वीतरागो दृढो निश्चयो यस्य चात्मस्वरूपे।
सदा दर्शनं स्पर्शनं तस्य पुण्यं तथा भाषणं संशयोच्छेदकं च।।१३३।।
न यस्यास्ति गर्वः सदा वीतरागः क्षमाशांतिभाग्यश्च योगी दयालुः।
न हि क्षोभलोभौ न दैन्यं च यस्मिँस एतैरभिज्ञायते योगिराजः।।१३४।।
विधेया मनः संगतिः सज्जनेन यतो वृत्तिशुद्धिर्भवेदुर्जनस्य।
बलाद्भावसद्बुद्धिसन्मार्गलाभो महाक्रूरकालाद्भयस्यापि भंगः।।१३५।।
भयव्याप्तमेतद्धि विश्वं समस्तं भयातीतमेकं सदानंदमस्ति।
यदालोक्य विद्येत नो द्वैतभावो भयं मानसात्सर्वथा हि प्रणश्येत्।।१३६।।
जनाँश्रेष्ठसंतः प्रबोध्य प्रयाताः परं हन्त जीवा यथापूर्वमज्ञाः।
स देहात्मबुद्धेः प्रभावोऽत्र हेतुर्न गूढो निधिर्बुध्यतेऽहंतयेह।।१३७।।
भ्रमाल्लभ्यते नैव तद्गुप्तवित्तं नरः प्राप्नुयाज्जन्मदारिद्र्यमेव।
न देहात्मताधीर्लयं यस्य याता स नो विंदतेऽहंतया गूढवित्तम्।।१३८।।
इदं व्याप्तमेवास्ति तेनैव सर्वमभाग्यस्य दृश्यं जडं भासते तु।
न चाऽऽश्रद्धया पुण्यलाभः कदापि न गूढो निधिर्बुध्यतेऽहंतयेह।।१३९।।
निजं वस्त्वपि प्राप्यते नो प्रमादाद्गुणानां हि बंधाद्भवेद्देहदुःखम्।
गुणातीतवृत्तिर्भवेन्नैव यस्य स नो वेत्त्यहंतावशाद्गूढवित्तम्।।१४०।।
जनान्वक्ति दासो विधेया हि सेवा तथा ज्ञानिनः पादयुग्मं च वंद्यम्।
विना सद्गुरोरंजनं तन्न वेद्यं न हि ज्ञायतेऽहंतया गूढवित्तम्।।१४१।।
न वेद्यं न वेद्यं न वेद्यं हि तावतन्मनः संशयो नश्यते नैव यावत्।
न नश्येन्न नश्येदहंता हि यावद् बलान्नैव वेद्यं न वेद्यं हि तावत्।।१४२।।
अविद्यावशात्संप्रबोधो न यावद्भ्रमात्स्वं हितं बुध्यते नैव तावत्।
परीक्षां विना नाणकं स्वीकृतं स्यात्परं सत्यमिथ्याप्रतीतिः कथं स्यात्।।१४३।।
जगत्यामृतं किं मनो विद्यतेऽत्र स्वयं सादरं तत्त्वया संविचार्यम्।
तथा कुर्वतो देवबोधः शनैः स्याच्छनैर्भ्रांतिरज्ञानजन्या विनश्येत्।।१४४।।
सदा चिंतयन्निंद्रियार्थान्हि जीवः अहंकारतोऽज्ञानतो जायतेऽत्र।
विवेकात्सदा स्थेयमात्मस्वरूपे यतो ब्रह्मभावे न जन्म स्वभावात्।।१४५।।
यदेवास्ति दृश्यं चिरस्थायि नो तदकस्मात्सदा रूपवत्कालभंग्यम्।
प्रणश्येद्धि सर्वं न किंचिच्च तिष्ठेन्मनः सच्चिदानंदमन्विष्य नित्यम्।।१४६।।
न भंग्यं न खंड्यं न चाल्यं न पात्यं ततं सर्वतोऽहंतया तन्न वेद्यम्।
न तस्याद्वितीयस्य चान्यद्विसह्यं मनः सच्चिदानंदमन्वेषितव्यम्।।१४७।।
निराकारमाधारभूतं हि सृष्टेरहो वर्णने यस्य वेदा अशक्ताः।
विवेकात्तदाकारता तेऽस्तु नित्यं मनः सच्चिदानंदमन्वेषितव्यम्।।१४८।।
जगत्यां न यच्चर्मदृष्ट्या हि लक्ष्यं जगत्यां तु यज्ज्ञानदृष्ट्या निरीक्ष्यम्।
जगत्यां यदालोकिते द्रष्टृलोपो मनः सच्चिदानंदमन्वेषितव्यम्।।१४९।।
न पीतं न शुभ्रं न वा श्याममेतन्न यद्व्यक्तमव्यक्तरूपं न नीलम्।
मनः श्रद्धया दासवाक्याद्विमुक्तिर्मनो मार्गय त्वं सदानंदरूपम्।।१५०।।
ऋतं तद्धि संचित्य संचित्य वेद्यं मनो बोध्य संबोध्य तत्स्याच्च बुद्धम्।
परं सर्वबोधः सतामेव संगाद्वरो निश्चयो जायते चानुरागात्।।१५१।।
वृथा चातुरी शाब्दबोधो वृथैव परं निश्चयोऽवश्यकोंऽतःस्थितस्य।
मनस्तत्त्वमन्यद्धि तत्सारभूतं समस्तेषु तद्ध्येकमेवाद्वितीयम्।।१५२।।
न पिंडावबोधान्न तत्त्वावबोधात्समाधानसिद्धिर्न संगीतशास्त्रात्।
न योगान्न यागान्न च त्यागभोगात्समाधानसिद्धिः सतामेव संगात्।।१५३।।
महावाक्यतत्त्वादिपंचीकृतानां सतां संगतौ व्याख्यया ब्रह्मदिक्स्यात्।
द्वितीया दिने चंद्रसंकेतशाखामुपेक्ष्यांततो लोक्यते चंद्र एव।।१५४।।
जगत्यां न यद्दृश्यते तद्विमृश्यं यथावद्विमर्शान्निगूढं स्फुटं स्यात्।
करे तद्ग्रहीतुं न शक्यं कदापि ततं सर्वगं नेंद्रियस्तद्धि वेद्यम्।।१५५।।
अहं ब्रह्म वेद्मीति वक्ता हि मूढो अतर्कस्य तर्के क्षमः को नु लोके।
जगत्यां न चालोक्यतेऽहंतया तत्तदलोकिते नैव शक्यं पृथक्त्वम्।।१५६।।
बहूनीह शास्त्राणि नानाविधानि प्रमाणैस्तु तेषां मतैक्यं न दृष्टम्।

विवादप्रियाः शास्त्रबोधाऽसमर्था मतिर्लीयते प्रत्यगात्मप्रबोधे।।१५७।।
श्रुतिः शास्त्रषट्कं स्मृतिस्तर्कशास्त्रं स्वयं शेषनागः सहस्नाननोऽपि।
अशक्ता हि तद्वर्णने सर्वथेमे मनस्त्वं निजज्ञानदर्पं विमुंच।।१५८।।
अहंतात्मिकी मक्षिका येन जग्धा रुचिर्भोजने तस्य पुंसः कथं स्यात्।
अहंता न यन्मानसे संविलीना तदीयं न जीर्णं भवेज्ज्ञानमन्नम्।।१५९।।
मनः खेदको नैव कार्योऽत्र वादो भवेत्तेन भेदश्च नाना विकाराः।
मनो मा परान्बोधय त्वं नु तावद् अहंताऽस्ति चित्ते त्वदीये हि तावत्।।१६०।।
अहंता हि सर्वस्य दुःखस्य मूलमहंतेरितं बोधनं व्यर्थमेव।
अहंकारलोपाद्धि सर्वं सुखं स्यादहंताऽस्ति किं तत्स्वयं चिंतयस्व।।१६१।।
विवेकेऽप्यहंतायुतो यात्यनीतिम् अनीतिप्रभावाज्जनैः श्लाघ्यते च।
प्रमाणांतराण्यस्य बुद्धिर्जहाति स्थितोंऽतस्तु साक्षी विजानाति सर्वम्।।१६२।।
दृढा विद्यते यस्य देहात्मताधीः शरीरात्परं स्वं हितं तस्य नष्टम्।
'न देहोऽस्मि सोऽहं' सदा भाव्यमित्थं सदा साधुसंगो विधेयस्तदर्थम्।।१६३।।
मनःकल्पिताः कल्पनाः संप्रहेयास्ततो निर्गुणः सोंऽतरात्मा हि वेद्यः।
मनःकल्पनाः सर्वथा संविलेतुं सदा संगतिः सज्जनैः साधनीया।।१६४।।
अहंमूलिका स्वप्रपंचानुचिंता ततः स्वांतरे लोभ एव स्थिरः स्यात्।
हरेश्चिंतनान्मुक्तिकांता हि वर्या तदर्थं सदा साधुसंगो विधेयः।।१६५।।
शरीरात्मभावस्य विस्तार एषः प्रियापुत्रमित्रादिमोहान्ममत्वम्।
विवेकाद्भ्रमं जन्ममूलं निरस्येत्तदर्थं सदा साधुसंगं विदध्यात्।।१६६।।
वरो निश्चयः शाश्वतस्यात्र कार्यो मनः संशयो दासवाक्यान्निरास्यः।
क्षणानुक्षणं जन्मसार्थक्यमस्तु तदर्थं सतां संगतिः सर्वदाऽस्तु।।१६७।।
करोति स्ववृत्तिं प्रशांतां स साधुर्दुराशावशान्नैव गच्छेत्स दैन्यम्।
उपाधिर्हि देहात्मधीवर्धकोऽस्ति प्रबाधेत साधुं कथं कोऽप्युपाधिः।।१६८।।
अनंतस्य बोधाय साधुर्हि सेव्यः अहंकारविस्तार आदौ निरास्यः।
ततो निर्गुणं ब्रह्म तच्चिंतनीयं स्मृतिश्चापि देहात्मबुद्धेर्निरास्या।।१६९।।
त्यजेदात्मबेधेन देहात्मबुद्धिं विवेकेन संवीक्ष्यमात्मस्वरूपम्।
तदाकारवृत्तिर्न चेह स्वभावादतः सर्वदा तन्निदिध्यासितव्यम्।।१७०।।
मनो वस्तुतः सारभूतं तु गुप्तं भवेच्चक्षुषोर्गोचरं दृश्यमेव।
न दृग्गोचरं निर्गुणं रूपहीनमहंतावशान्नैव तत्कल्पनीयम्।।१७१।।
स्फुरेदिंद्रियार्थेषु या साऽस्त्यविद्या यया ब्रह्म विज्ञायते सा सुविद्या।
स्वयं कल्पना यैकमूला द्विधाऽभूद्विवेकाद्भवेत्साऽऽत्मरूपे विलीना।।१७२।।
उदेतिस्वरूपे ह्यहंकारराहुस्तदाच्छादितं जायते चिन्नभश्च।
दिशः पश्यतोऽस्त्यंधकारः समंतादतः सद्विवेकाद्विमर्शोऽत्र कार्यः।।१७३।।
न यच्चक्षुषा दृश्यतेऽस्मिन्हि विश्वे भवे नाशिते तेन नो तस्य रक्षा।
स्वयं सोऽक्षयोऽक्षय्यमोक्षं प्रयच्छेद्दयालुः स साक्षी भवेत्पक्षपाती।।१७४।।
लिखत्येव भाव्यं विधिः सर्वभाले परं लिख्यते केन तस्यापि भाले।
हरः संदहेल्लोकसंहारकाले परं शंकरं के दहेदंतकाले।।१७५।।
कृता द्वादशादित्यदेवाश्च रुद्राः कुपृथ्वीमिता येन शक्रा असंख्याः।
स देवो हि नान्विष्यमाणोऽपि लभ्यो न विज्ञायते कीदृशः कः प्रमुख्यः।।१७६।।
न खंड्यो न भंग्योऽस्ति यो देवदेवो न चाल्यो न लोप्यो न दीनः कदापि।
न दृग्गोचरः कस्यचिद्वा कदाचित्स सर्वत्रगोऽहंतया नैव वेद्यः।।१७७।।
मतो यस्य यः पूज्यते सोऽत्र देवः परं देवदेवं न वेत्तीह कश्चित्।
जगत्यां स्थिताः कोटिशोऽनंतदेवाः परं यः प्रियस्तस्य भक्तिर्वरिष्ठा।।१७८।।
त्रयस्तेऽपि लोका यतः संबभूवुर्न तं देवदेवं दिशत्यत्र कश्चित्।
जगत्यां वरिष्ठः स देवो निगूढो विना सद्गुरुं नैव वेद्यः कदापि।।१७९।।
गुरुत्वे स्थिताः कोटिशः संति लोके भृशं मंत्रतंत्रादिकार्येषु शक्ताः।
सदा क्षुद्रदेवार्चका दांभिकाश्च नृणां वंचका नैव मुक्तिप्रदास्ते।।१८०।।
न यो वंचको वित्तहर्ताऽभिचारी न वा निंदको मत्सरी दंभभक्तः।
न दुर्वर्तनो नोन्मदो बाधको नो गुरुर्ब्रह्मविद्दुर्लभः सोऽस्ति लोके।।१८१।।
न यो नर्मठो नैव यः कामकामी क्रियाशून्यवाचं न चैवोपयुङ्क्ते।
कृतिः किंतु यस्यास्ति भाषाऽनुकूला मनः सद्गुरुर्वेदितव्यः स एव।।१८२।।
सभक्तश्च विज्ञो विवेकी विरक्तः कृपालुर्मनस्वी क्षमी योगयुक्तः।
प्रभुर्ज्ञः सुदक्षश्च चातुर्यशाली भवेत्तेन संगात्समाधानलाभः।।१८३।।
अजं यत्तथाऽनागतं चास्ति तत्त्वं जनैर्जायते तत्सतामेव वाग्भिः।
अनिर्वाच्यमास्तां तथापीह वाच्यं मनः सच्चिदानंदमन्वेषितव्यम्।।१८४।।
निलीनो भवेत्सादरं रामरूपे भयान्मोचनं निश्चितं स्वस्वरूपे।
कदाप्येष नासाद्यते मृग्यमाणः सदैक्यं भवेद्भिन्नभावो न तस्मिन्।।१८५।।
सदा सर्वदा संनिधौ राघवोऽस्ति मनः सज्जन त्वं समन्विष्य सत्यम्।
तवाखंडितो राघवेणास्ति योगस्त्यज स्वामहंतां वियोगैकहेतुम्।।१८६।।
मनो भूतसाम्यं समग्रेऽस्ति विश्वे परं विद्यते नैव तत्स्वस्वरूपे।
मनो भाति यत्सर्वमालोकनीयं समुत्सृज्य संगं सुखं संनिवास्यम्।।१८७।।
शरीरात्मता ज्ञानशस्त्रेण भेद्या विदेहस्थितौ भक्तिमार्गो हि सेव्यः।

विरक्तेर्बलान्निंद्रियजातं प्रहेयं परित्यज्य संगं सुखं संनिवास्यम्।।१८८।।
मही निर्मिता येन वेद्यः स देवो विदित्वैव तं मुक्तिलाभोऽस्ति सद्यः।
मनो निर्गुणं तं गुणिष्वत्र पश्येत्समुत्सृज्य संगं सुखं चात्र तिष्ठेत्।।१८९।।
स नो कार्यकर्ता न वा सृष्टिभर्ता परातः परो नो विवर्तेन लिप्तः।
परं निर्विकल्पो विकल्प्यैव सेव्यः परित्यज्य संगं सुखं संनिवास्यम्।।१९०।।
न देहात्मधीकल्पना यस्य लुप्ता स कल्पांतकालेऽपि न ज्ञानवाँ स्यात्।
परब्रह्म न ज्ञायतेऽहंतया तद्भवेच्छून्यबोधस्तदज्ञानमेव।।१९१।।
अनाकल्यरूपेऽपि यत्सत्सदैव द्वितीयं न सर्वोत्तमेऽत्रानुभूते।
न दृष्टांतयोग्यं किमप्यस्ति विश्वे न संगो न निःसंगता तत्र सह्या।।१९२।।
न विज्ञो न चाज्ञो स देवाधिदेवो न वेदादिशास्त्रैः पुराणैश्च वर्ण्यः।
अदृश्यो न दृश्यो न साक्षी न चासौ श्रुतिर्नैव जानाति रे तस्य पारम्।।१९३।।
स सर्वस्य हृत्स्थोऽस्ति कः कीदृशो वा गुरुं सादरं साधकः पृच्छतीत्थम्।
विहायात्र देहं वसत्येष कुत्र पुनर्जन्म पश्चाद्भवेत्तस्य कुत्र।।१९४।।
स हृत्स्थो हि देवोऽवगच्छेदृशोऽस्ति नभोवत्खलु व्यापकोऽस्तीति विद्धि।
सदा सर्वगो नैति नायाति चैव तथा तेन रिक्तं स्थलं नैव नैव।।१९५।।
नभोमंडले संचरद्रेणुमात्रं न किंचित्स्थलं राघवेणास्ति रिक्तम्।
तमेवानुपश्यन्भवेत्तत्स्वरूपो लयं यात्यलक्षं च लक्षं च तस्मिन्।।१९६।।
नभोवद्धि तद्व्यापकं रामरूपं निदिध्यासितं चेद्भवोच्छेदकं स्यात्।
न देहात्मधीर्दर्शने तस्य तिष्ठेत्सदाऽऽलोकने चापि नैवास्ति तृप्तिः।।१९७।।
नभोव्याप्तरूपा यथा सर्वसृष्टिस्तथा राघवेणेति साम्यं न युक्तम्।
स एवाद्वितीयः स्वभावाद्धि रामस्तदर्थे पदं व्यापकेत्यस्त्ययुक्तम्।।१९८।।
पुराणं परं विस्तृतं तद्धि रूपं न कस्यापि तत्तर्कगम्यं कदाऽपि।
सुगूढं तथाऽप्याशु तत्स्यात्सुबोधं प्रसादाद्गुरोरद्वितीयं हि वेद्यम्।।१९९।।
स्वरूपं यदा ज्ञायते ज्ञानयोगात्तदानीं विलुप्येत तत्सर्वसाक्ष्यम्।
अवस्थोन्मनी कुंठिता वाक्तदानीं स रामोऽस्ति सर्वत्र तं पश्य रामम्।।२००।।
स्वबोधे हि जाते द्वितीयं न भाति न वा विद्यते मानसे द्वैतलेशः।
बहोः कालतः संगमो हंत जातो विदेहस्थितेः सर्वकाया विलीनाः।।२०१।।
मनो यत्सुगूढं त्वया तद्धि लब्धं परं यत्नतस्तत्सदा रक्षितव्यम्।
सदा श्राव्यमेतद्दृढप्रत्ययार्थं सदा साधुसंगाच्च धन्यो भवेस्त्वम्।।२०२।।
मनः सर्वसंगः समुत्सर्जनीयः अतीवादरात्साधुसंगो विधेयः।
सतां संगमात्स्यान्महादुःखभंगो विना साधनं स्याद्धि सन्मार्गलाभः।।२०३।।
मनः साधुसंगोऽन्यसंगापहोऽस्ति मनोऽनेन मोक्षस्य सद्योऽस्ति लाभः।
मनः साधकान्मोचयत्येष शीघ्रं मनोऽनेन निःशेषतो द्वैतनाशः।।२०४।।
मनोबोधमाकर्ण्य निर्यांति दोषा जडा मानुषाः साधनार्हा भवंति।
ततो ज्ञानवैराग्यसामर्थ्यलाभस्तथा दासवाक्ये प्रतीत्या विमुक्तिः।।२०५।।

।।जयतु जयतु रघुवीरः समर्थः।।

हरिश्चंद्र त्र्यंबक देसाई-विरचितः मनोबोधः